Roll No. ______________________ [Total No. of Pages : 2

**PGIVS-004 A-19**

# M.A. IV - Semester Degree Examination

## SANSKRIT

(Sanskrit Dramaturgy)

**Paper - H.C 4.1**

**Time : 3 Hours** **Maximum Marks : 80**

**सूचनाः सर्वे प्रश्नाः समाधेयाः।**

I. चत्वारि सानुवादं विवृणुत। (4×4=16)

1) नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते।
मदाभोगघनध्वानो नीलकण्ठस्य ताण्डवे।।

2) व्याकीर्णे मन्दबुद्धीनां जायते मतिविभ्रमः।
तस्यार्थस्तत्पदैस्तेन संक्षिप्य क्रियतेऽञ्जसा।।

3) अधिकारः फलस्वाम्यमधिकारी च तत्प्रभुः।
तन्निर्वर्त्यमभिव्यापि वृत्तं स्यादाधिकारिकम्।।

4) गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः।
द्वादशाङ्गः पताका स्यान्नवा स्यात्प्राप्तिसम्भवः।।

5) सर्वेषां नियतस्यैव श्राव्यमश्राव्यमेव च।
सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम्।।

6) यौवने सत्त्वजाः स्त्रीणामलङ्कारस्तु विंशतिः।
भावो हावश्च हेला च त्रयस्तत्र शरीरजाः।।



Scanned by CamScanner

Roll

(4×4=16)

II. चत्वारि ससन्दर्भं विवृणुत।

1) रूपकं तत्समारोपात्।

2) नृत्तं तालल्याश्रयम्।

3) प्रकरी च प्रदेशभाक्।

4) आदानं कार्यसंग्रहः।

5) अन्तर्यवनिकासंस्थैश्चूलिकार्थस्य सूचना।

6) सान्या साधारणस्त्रीति तद्गुणा नायिका त्रिधा।

(16)

III. नाट्यशास्त्रंप्रति धनञ्जयस्य उपायनं निर्धरत।

(अथवा)

गर्भसन्ध्यङ्गान् सोदाहरणं विवृणुत।

(16)

IV. नायकस्य लक्षणान् सोदाहरणं विवृणुत।

(अथवा)

स्वीथानायिकाप्रभेदान् सोदाहरणं विवृणुत।

(4×4=16)

V. चतुर्णां टिप्पणीः लिखत।

1) अवस्थाः।

2) पताका।

3) मुखसन्धिः।

4) विष्कम्भः।

5) आधिकारिकं वस्तु।

6) नृत्यम्।

---

Scanned by CamScanner

Roll No. ______________________ [Total No. of Pages : 2

# PGIVS-006 A-19

## M.A. IV - Semester Degree Examination

## SANSKRIT

**(Prescribed Text :- Vakroktijīntā Of Kunkata) (Ch. I)**

**Paper - S.C. 4.1 (Alankārashāstra)**

**Time : 3 Hours** **Maximum Marks : 80**

सूचनाः सर्वे प्रश्नाः समाधेयाः।

**I.** अलङ्कारशास्त्रंप्रति कुन्तकस्य उपायनं निर्धरत। **(16)**

**(अथवा)**

कुन्तकस्य देश - काल-कृतिविषये प्रबन्धमारचयत।

**II.** चत्वारि अनूद्य विवृणुत। **(4×4=16)**

1) धर्मादिसाधनोपायः सुकुमारक्रमोदितः।
काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः।।

2) शब्दो विवक्षितार्थैक वाचकोऽन्येषु सत्स्वपि।
अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः।।

3) अलंक्रतिरलङ्कार्यमपोदधृत्य विवेच्यते।
तदुपायतया तत्त्वं सालङ्कारस्य काव्यता।।

4) साहित्यमनयोः शोभाशालितां प्रति काप्यसौ।
अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः।।

5) अलंकारस्य कवयो यत्रालङ्करणान्तरम्।
असन्तुष्टा निबध्नन्ति हारादेर्मणिबन्धवत्।।

6) आञ्जसेन स्वभावस्य महत्वं येन पोष्यते।
प्रकारेण तदौचित्यमुचिताख्यान जीवितम्।।



Scanned by CamScanner

Roll No.

(4×4=16)

**III.** चतुर्णां काव्यसौन्दर्यं विमृशत।

1) द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः।
कला च सा कान्तिमती कलावतस्त्वमस्य च नेत्रकौमुदी।।

2) स्वेच्छा केसरिणः स्वच्छस्वच्छायासितेन्दवः।
त्रायन्तां वो मधुरिपोः प्रपभार्तिच्छिदो नखाः।।

3) प्रथममरूणच्छायस्तावत्ततः कनक्रप्रभ स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः।
प्रसरति ततो ध्वान्तध्वंसक्षमः क्षणदामुखे सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः।।

4) उपस्थितां पूर्वमपास्य लक्ष्मीं वनं मया सार्धमसि प्रपन्नः।
त्वामाश्रयं प्राप्य तया नु कोपात्सोढास्मि न त्वद्भवने वसन्ती।।

5) प्रवृद्धतापो दिवसोऽतिमात्रमत्यर्थमेव क्षणदा च तन्वी।
उभौ विरोधक्रियया विभिन्नो जायापती सानुशयाविवास्ताम्।।

6) कामेकपत्नीं व्रतदुःखशीन्तां लोलं मनश्चारूतया प्रविष्टाम्।
नितम्बिनीमिच्छसि मुक्तलज्जां कण्ठे स्वयंग्राहनिषक्तबाहुम्।।

**IV.** कुन्तकमतानुसारेण विचित्रमार्गं सलक्षणं सोदाहरणं च विवृणुत। (16)

**(अथवा)**

काव्य प्रयोजनमधिकृत्य प्रबन्धमारचयत।

**V.** चतुर्णां टिप्पणीः लिखत। (4×4=16)

1) स्वभावेक्तिः।
2) वर्णविन्यासवक्रता।
3) पदपरार्धवक्रता।
4) मध्यममार्गः।
5) लावण्यम्।
6) साहित्यम्।



Scanned by CamScanner

Roll No. ________________________ [Total No. of Pages : 2

**PGIVS-005 A-19**

**M.A. IV - Semester Degree Examination**

**SANSKRIT**

**(Ancient Indian Polity)**

Text :- Arthashāstra of Kautilya (Ch. I)

**Paper - H.C 4.2**

**Time : 3 Hours** **Maximum Marks : 80**

**सूचनाः सर्वे प्रश्नाः समाधेयाः।**

**I.** अर्थशास्त्रंप्रति कौटिल्यस्य उपायनं निर्धरत। **(16)**

**(अथवा)**

कौटिल्यस्य देश-काल-कृतिविषये प्रबन्धमारचयत।

**II.** चत्वारि ससन्दर्भं विवृणुत। **(4×4=16)**

1) अर्थमूलौ हि धर्मकामौ।

2) दण्डमूलास्तिस्रो विद्याः।

3) सवेपिधाशुद्धान् मांन्त्रणः कुर्यात्।

4) आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता।

5) प्रत्यक्षपरोक्षानुमेया हि राजवृत्तिः।

6) परमर्मज्ञः प्रगल्भश्च्छात्रः कापटिकः।

**III.** विद्यासमुद्धेशमधिकृत्य प्रबन्धमारचयत। **(16)**

**(अथवा)**

मन्त्रिपूरोहितोत्पात्तिप्रकरणं विमृशत।



3

Scanned by CamScanner

IV. अमात्यसम्पदं यथापाठ्चं निरूपयत। (16)

(अथवा)

किं नाम उपधा? उपधाप्रक्रारान् विवृणुत।

V. चतुर्णां टिप्पणीः लिखत। (4×4=16)

1) वृद्धसंयोगः।

2) वार्ता।

3) गूढचर्या।

4) इन्द्रियजयः।

5) गूढपुरूषप्रणिधिः।

6) वर्णाश्रमधर्माः।

---

Scanned by CamScanner

(16)

Roll No. ____________________ 

[Total No. of Pages : 2

# PGIVS-007 A-19

## M.A. IV - Semester Degree Examination

## SANSKRIT

(Prescribed Text :- Dhvanyāloka of Anandavardhana) (Ch. I & II)

**Paper - S.C. 4.2** (Alankārashāstra)

**Time : 3 Hours** **Maximum Marks : 80**

सूचनाः सर्वे प्रश्नाः समाधेयाः।

**I.** अलङ्कारशास्त्रंप्रति आनन्दवर्धनस्य उपायनं निर्धरत। **(16)**

**(अथवा)**

ध्वनिप्रस्थानमधिकृत्य प्रबन्धमेकं लिखत।

**II.** चत्वारि अनूद्य विवृणुत। **(4×4=16)**

1) प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।

2) यत्तार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।

3) भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः।
अतिव्याप्तेख्याप्तोर्नचाऽसौ लक्ष्यते तया।।

4) आलोकार्थी यथा दीपशिखायां यत्नवान् जनः।
तदुपायतया तद्वदर्थे वाच्ये तदादृतः।।

5) वाच्यवाचकचारूत्वहेतूनां विविधात्मनाम्।
रसादिपरता यत्र स ध्वनेर्विषयो मतः।।

6) तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।
अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत्।।



Scanned by CamScanner

(4×4=16)

III. चतुर्णां काव्यसौन्दर्यं विवृणुत।

1) अनुरागवती सन्ध्या दिवसस्तत्पुरस्सरः।
अहो दैवगतिः कीदृक्तथापि न समागमः।।

2) श्वश्रूरत्र निमज्जति अत्ताऽहं दिवसकं प्रलोकय।
मा पथिक रात्र्यन्धक शय्यायामावयोर्माङ्क्षीः।।

3) उपोदरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।
यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागदगलितं न लक्षितम्।।

4) सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरूषास्त्रयः।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्।।

5) भ्रम धार्मिक विस्रब्धः स शुनकोऽद्य मारितस्तेन।
गोदानदीकूललताकुञ्जवासिना दृप्तसिंहेन।।

6) गगनं च मत्तमेघं छारालुलितार्जुनानि च वनानि।
निरहङ्कारमृगाङ्का हरन्ति नीला अपि निशाः।।

IV. अन्तर्भाववादं सोदाहरणं निराकुरूत। (16)

(अथवा)

ध्वनिप्रभेदान् सोदाहरणं विवृणुत।

V. चतुर्णां टिप्पणीः लिखत। (4×4=16)

1) अनिर्वचनीयवादः।

2) विवक्षितान्यपरवाच्यध्वनिः।

3) प्रतिभा।

4) आनन्दवर्धनस्य देश कालादयः।

5) सहृदयः।

6) वाच्यार्थः।



Scanned by CamScanner